# SANSKRIT

***(Maximum Marks: 80)***

***(Time allowed: Three hours)***

(*Candidates are allowed additional 15 minutes for* ***only*** *reading the paper.*

*They must NOT start writing during this time.*)

---

*Answer all questions* from *Sections A and B and any* ***four*** *questions from Section C.*

*If you answer* ***two*** *questions or more on any* ***one*** *book, do not base them on the* ***same*** *material.*

*The intended marks for questions or parts of questions are given in brackets [].*

---

**SECTION A – 18 MARKS**

*Answer* ***all*** *questions.*

**Question 1**

(i) Disjoin Sandhis of *any three* of the following: **[3]**

अधोदत्तानां केषाञ्चित् त्रयाणां शब्दानां सन्धिविच्छेदं कुरुत ।

देवात्मा, हरिरपि,कुमार्यत्र,लोकेस्मिन्,भगवद्गीता

(ii) Expound *any three* of the following , giving the names of the compound: **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां समस्तपदानां विग्रहं कृत्वा समासस्य नाम अपि लिखत ।

निर्मक्षिकम् , रामभक्तः , त्रिनेत्रः , वाक्त्वचम् , नवग्रहः,हरिहरौ

(iii) Split *any three* of the following words: **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां पदानां प्रकृतिप्रत्ययविभागं कुरुत ।

पातव्य,श्रुत,उपवेष्टुम्,प्रक्षाल्य,नदी, ज्ञात्वा

(iv) Change the voice of *any three* of the following sentences: **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां वाक्यानां वाच्यं परिवर्तयत ।

(a) हरिणा बालाः पाठिताः

(b) बालकाः कथाः श्रोष्यन्ति ।

(c) राधा कृष्णम् आह्वयति ।

(d) ते प्रतिदिनं मन्दिरं गच्छन्ति ।

(e) युष्माभिः गृहे क्रीड्यते ।

(f) भवता सत्यम् उक्तम् ।

**Question 2** **[6]**

Translate the following passage into Sanskrit:

अधोलिखितस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कुरुत :-

When Gandhi returned to India in 1915, he led campaigns to improve the lives of peasants, farmers and labourers. He also popularised the concept of non-violent resistance, which was later known as *satyagraha*, a Sanskrit and Hindi word meaning 'holding onto truth'. It not only included methods of civil disobedience such as boycotts and strikes, but also a complete rejection of violence in any form, even in self-defence. Gandhi showed his support for India's rural poor by rejecting Western clothes for the traditional *dhoti* and living a simple and self-sufficient lifestyle.

## SECTION B – 34 MARKS

*Answer **all** questions.*

**Question 3**

Translate the following passages into English.

अधोलिखितयोः गद्यांशयोः आङ्गलभाषया अनुवादं कुरुत :

(i) आरूढे च तस्मिन् शनैः शनैः ततः दृष्टिं निर्वर्त्य प्रस्तरप्रतिहतगतिप्रसरः श्रमस्वेदार्द्रशरीरम्,इन्द्रायुधम् आत्मानं च अवलोक्य स्वयमेव विहस्य अचिन्तयत् – अहो मे निरर्थकव्यापारेषु अभिनिवेशः,अहो मे मूर्खतायाः प्रकारः, अहो मे बालिशचरितेषु आसक्तिः , किमनेन गृहीतेन किन्नरयुगलेन **[6]**

प्रयोजनम् ? कस्मात् अहम् आविष्ट इव निजपरिवारान् उत्सृज्य भूमिम् एतावतीम् आयातः । न जाने कियताध्वना विच्छिन्नम् ,इतः बलम् अनुयायि मे । न चागच्छता मया किन्नरमिथुने बद्धदृष्टिना महावनेस्मिन् पन्थाः निरूपितः,येन प्रतिनिवृत्य यास्यामि ।

(ii) तारापीडस्तु तम् "एहि एहि" इत्यभिदधानः दूरादेव प्रसारितभुजयुगलः सुदृढम् आलिलिङ्ग । आलिङ्गितोन्मुक्तश्च चन्द्रापीडः पितुः चरणसमीपे क्षितितल एव निषसाद । मुहूर्तमिव स्थित्वा पित्रा विसर्जितः मातरम् उपसृत्य प्रणम्य वैशम्पायनद्वितीयः शुकनासं द्रष्टुम् अयासीत् । द्वारदेश एव अवस्थाप्य तुरङ्गमम् उपदर्शितविनयः प्रविश्य भवनं दूरावनतेन मौलिना शुकनासं ववन्दे । शुकनासः ससम्भ्रमम् उत्थाय गाढम् **[6]**

आलिलिङ्ग । अथ तेन सबहुमानम् आशीर्भिः अभिनन्द्य विसर्जितः स्वभवनम्  आजगाम । तत्र स्नानादिकाः क्रियाः कृत्वा तं दिवसम् अत्यवाहयत् ।

**Question 4**

Translate the following verses into English.

अधोलिखितयोः पद्यांशयोः आङ्गलभाषया अनुवादं कुरुत ।

(i) स वेलावप्रवलयां परिखीकृतसागराम् । **[7]**
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥
तस्य तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥

(ii) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् । **[7]**
यशसे विजिगीषूणाम् प्रजायै गृहमेधिनाम् ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

**Question 5**

Explain the following with reference to the context.

अधोलिखितयोः उद्धरणयोः सन्दर्भप्रसङ्गाभ्यां सह व्याख्यां कुरुत :-

(i) अम्बा तु मत्समीपम् आगत्य सुचिरं स्थित्वा स्वभवनम् अयासीत् । **[4]**

(ii) उत्थाय च कथमपि सखीजनेन नीयमाना । **[4]**

## SECTION C – 28 MARKS

*Answer **any four** questions*

**Question 6** **[7]**

राजा दिलीपः वशिष्ठमहर्षेः आश्रमस्य अन्तः किं किम् अपश्यत् ?

**Question 7** **[7]**

दिलीपः स्वप्रजाः कथम् अपालयत् ? तस्य शासनम् कैः कारणैः उत्तमम् आसीत् ?

**Question 8** **[7]**

कालिदासेन वर्णितान् राज्ञः दिलीपस्य गुणान् विस्तरेण लिखत ।

**Question 9** **[7]**

चन्द्रापीडस्य यात्रायाः वर्णनं लिखत। स मार्गे गम्यमानः किं किम् अद्राक्षीत् ?

**Question 10** **[7]**

शूद्रकः वैशम्पायनं दृष्ट्वा तस्य विषये किं किम् अपृच्छत् ?

**Question 11** **[7]**

केयूरकः चन्द्रापीडम् उपसृत्य कादम्बर्याः दशां कथम् अवर्णयत् ?